क्रम सं० २२

प्रवेश सं०

विषय: कर्मकाण्डम्

ग्रन्थकार

नाम श्रवणद्वादशीव्रतम्

पत्र सं० १-४

अक्षर सं० (पङ्क्तौ) ४४ पंक्ति सं० (पृष्ठे) १५

श्लोक सं०

आधार: कागज

आकार: ९.१ x ४.४ 009075 लिपि: दे-ना-

वि० विवरणम् ५-

आ. ३०८४

सी० एस० यू० पी०--७७ एस० सी० ई०--१९५१--५० ०००

Indira Gandhi National Centre for the Arts

३२२

श्रीगणेशाय नमः ॥ विष्णो वरेण्य वरद वराह चरणोद्धर ॥ जपवित्रं पवित्रं मां कुरु श्रीप्रं जनार्दनं ॥ १ ॥ सहस्रशीर्षा आवा
हनं ॥ करकं पूरयिष्यामि सरितां सगमेजले ॥ पंचरत्नसमायुक्ते तेन तुष्य नु वामनः ॥ २ ॥ पुरुष एवेदं० आस
नं ॥ अतसीपुष्पसंकाशं नील कुंजाजिनप्रभं ॥ कुरुक्षेत्रे प्रतिष्ठाप्य वामनं तं भजाम्यहं ॥ ३ ॥ एतावानस्य०
पाद्यं ॥ गंगा सरस्वती पुण्या गोविंदचरणच्युता ॥ अच्युतार्थं मया दत्तं गोविंद प्रतिगृह्यतां ॥ ४ ॥ त्रिपादूर्ध्व०
द्वादश्यां परमात्मा त्वा सर्वपापं हरं तु मो ॥ अर्घ्यं० ॥ गंगाजलं समानीतं सुवर्णकलशे स्थितं ॥ आचम्यतां हृषी
केश त्रैलोक्याघविनाशन ॥ ५ ॥ तस्माद्विराळजायत० आचमनं ॥ ततः पंचामृतस्नानं ॥ गंगा सरस्वती पुण्या
पयोष्णी नर्मदाजलैः ॥ स्नापितोसि मया देव तथा शांतिं प्रयच्छ मे ॥ ६ ॥ स्नानं० नमस्ते दिति पुत्राय पीतनिर्मलवा
ससे ॥ वासोयं देवतामीश प्रतिगृह्य नमोस्तु ते ॥ ७ ॥ वस्त्रं ॥ यत्पुरुषेण हविषा० मलयाचलसंभूतं हृदयानंदवर्द्धनं ॥
काश्मीरघनसारा ढ्यं चंदनं प्रतिगृह्यतां ॥ ८ ॥ गंधं० अक्षताः परमा दिव्याः सर्वकामफलप्रदाः ॥ पूजार्थं स
रक्षणार्थं गृह्य परमेश्वर ॥ ९ ॥ अक्षताः ॥ मल्लिकाशतपुष्पं च जातीपुष्पसमन्वितं ॥ चंपके जलजैर्युक्तं
गृहाण परया मुदा ॥ १० ॥ पुष्पाणि ॥ अथांगपूजा ॥ मत्स्याय पा० दौपृ० कूर्माय० का० वराहाय० जठरं०
नारसिंहाय० उदरं पू० वामनाय० कंठं पू० रामाय० दक्षिणभुजं० परशुरामाय वामभुजं पू० कृष्णाय० नेत्रे०
बुद्धाय ललाटं ॥ कल्किने० सर्वांगं पू० वनस्पतिरसोद्भूतो दिव्यो नानागंधसंयुतः ॥ आघ्रेयः सर्वदेवानां धूपोयं प्र
तिगृह्यतां ॥ ११ ॥ धूपः ॥ आज्यं च त्रिवर्ति० दीपं० त्वमेव ज्ञातासर्वदेवानां त्वमेव जगतः पिता ॥ मया निवेदितं भक्त्या
नैवेद्यं प्रतिगृह्यतां ॥ १२ ॥ नैवेद्यं० कराद्वर्तनं ॥ इदं फलं० फलं० पूगीफलमिति तांबुलं ॥ हिरण्यग

ल्पेति दक्षिणां॥ अग्निर्वायुर्यमास्त्वष्टा सदा पापं हरंतु मे॥ दधिभक्तस्थापनं॥ सितोऽसि दधिभक्तोऽसि लंबितोऽसि
मया प्रभो॥ सत्वे ऐवास्थितो सि त्वं वामनो यः प्रदीयते॥ सिन्यपूजनमंत्रः॥ दधिभक्तघटं पूर्णं करकं जलपूरितं॥
वामनप्रीणनार्थाय मया धवायदद्दाम्यहं॥ करकदानं॥ वामनो बुद्धिदो दाता द्रव्यस्थो वामनः स्वयं॥ वाम
नोस्य प्रदानेन नभो गतास्तु प्यतां॥ मूर्ति॥ वायदानं॥ यन्मया मत्रसंयुक्तं पत्रपुष्पफलं जलं॥ निवेदितं च नै
वेद्यं तद्गृहाण जगत्पते॥ इति प्रार्थना॥ अतसीपुष्पसंकाशं पीतनिर्मलवाससं॥ येन मस्यं ति गोविंदं न
९ तेषां विद्यते भयं॥ कुश्छाजिनस्थापनं॥ अर्घ्यदानमंत्रः॥ इंद्रस्यावरजो देवो दितेर्हृदयनंदनः॥ वलि
वैद्धृस्यादेव गृहाणार्घ्यं तु वामन॥ नमो नमस्ते गोविंद नमस्ते जलशायिने॥ द्वादश्यां मे गृहाणार्घ्यं
युक्तो यो श्रवणेन तु॥ अर्घ्यमंत्रः॥ इति पूजाविधिसमाप्तः॥ अथ कथा॥ सूत उवाच॥ शृणु पार्थ वहि
तो त्रस्तकीर्तिमानं मयानघ॥ तिथिनक्षत्रसंयोगमुपकारकरं नृणां॥१॥ सविधानं प्रवक्ष्यामि
स मंत्रं च तथा नृणां॥ द्वादशी विष्णुदयिता द्वादशी वैष्णवी तिथिः॥२॥ श्रवणेन समायुक्ता कदाचिद्य
दि जायते॥ भाद्रे मासि सिते पक्षे विजया सा प्रकीर्तिता॥३॥ जातो विष्णुरदित्यां तु तस्मात्सा विजया स्मृता
उपोष्या च प्रयत्नेन नमसौ नाम हिता तिथिः॥४॥ एकैवो पोषिता धात्र्या एकाजोति जयप्रदा॥ कृतार्था ता
पतेमर्हीस्तीमुपोष्या द्विजोत्तमाः॥५॥ विधानं तत्र वक्ष्यामि शृणुष्वावहितो मम॥ कुर्यात्सौवर्णिकं

देववामनं तमथाव्ययं॥६॥ उपोषितो नरो भक्त्या स्थापयेत्प्रतिमाग्रतः॥ पूजयेत्प्रथमं वि
व प्राद्देवं जनार्दनं॥७॥ गंधैः पुष्पैस्तथा धूपैर्नैवेद्यैर्विविधैरपि॥ ततस्तस्य पुरः कुंभं न्य
सेद्धूत्वा जीर्न कुंभः॥८॥ कुशास्तरणं प्रागग्रं विधाय परितस्ततः॥ तस्योपरि तिलानां
च कृत्वा नामाद्रकं न्यसेत्॥९॥ तिलाभावे यवा ग्राह्याः गोधूमास्तदलाभतः॥ उदर्यात
प्रफलं प्रस्थं तिलैः संप्राप्यते भुवि॥१०॥ तेषामुपरि सौवर्णं वामनं विधिवन्न्यसेत्
ततः संपूजयेद्देवं पुनरेव जनार्दनं॥११॥ ततस्तस्य समीपे तु दधिभक्तघटं न्यसेत्॥
करकं पुरतः स्थाप्य गंधोदकसमन्वितं॥१२॥ छत्रं च यज्ञसूत्रं च पादुकां च समी
पतः॥ न्यसेत्सर्वं भक्त्या तु शुचिः शुद्धेन चेतसा॥१३॥ नैवेद्यैर्विविधैर्भक्ष्यैः सर्वै
स्तत्र प्रपूजयेत्॥ दद्यात्तं द्विजवर्याय वामनं तिलसंस्थितं॥१४॥ प्रभाते विमले स्ना
त्वा संध्यां कृत्वा विधानतः॥ वामनो बुद्धिदो दाता द्रव्यस्थो वामनः स्वयं॥ वामनोस्य
प्रतिग्राही वामनाय नमो नमः॥१५॥ भक्तितो वित्तशाठ्येन सहिरण्यं नकारयेत्
मंत्रादूतगुणं भक्त्या लब्ध्वा लक्षगुणं भवेत्॥१६॥ भक्तिमंत्रसमोपेतं कोटिको
टिगुणोत्तरं॥ मंत्रोक्तेन विधानेन पूर्वोक्तेन च विस्तरात्॥१७॥ यस्त्विमं सरह

Indira Gandhi National Centre for the Arts

२ स्यं च विधिं संप्रतिकारयेत्॥ उपदेशप्रदो लोके तारकः परिकीर्तितः॥१८॥ दानस्यास्य प्रभावेन पुरा
वृत्तं शृणु द्विज॥ वाच्यमानमशेषेण श्रूयतां सुपकारकं॥१९॥ वैश्यः कश्चित्सुराष्ट्रेऽस्मिन्नासीद्ब
हुधनो भुवि॥ हरिदत्त इति ख्यातो वणिग्धर्मोपजीवकः॥२०॥ सभांडं विविधाकारं प्रगृह्य ब
हुवाहनः॥ अनेकानि सहस्राणि कुंभांश्चैव तु वाहयेत्॥२१॥ स तेन सह भांडेन देशांतरम
गाद्वणिक्॥ स गच्छंश्च बहून्देशान्मरुदेशमिवाणिक्सह॥२२॥ निर्जलांश्चैव निर्वृक्षांस्तप्तवालु २
कसंयुतान्॥ तत्र देववशाद्देवसार्थभ्रष्टो वणिक्पथि॥२३॥ एक एव ययौ मार्गे दृष्टास्तेन प्रे
मर्यादितः॥ ददर्शाथ महता नगेपि शाचानां महागणं॥२४॥ तेषां मध्ये महाकायः सुस्वरूपः
शुभदर्शनः॥ पिशाचाधिपतिः श्रीमान्वृतः सर्वैः परिवारितः॥२५॥ वणिक्सोऽपि तदाश्चर्यं दृष्ट्वां
तिकमुपागमत्॥ भीतित्रस्ततः सोऽथ जगाम पथि चिंतयन्॥२६॥ तेपि गत्वा पिशाचान्ते
न्यग्रोधं सुमहातेकं॥ शीतच्छायं सुविस्तीर्णं तद्देशादुपाविशन्॥२७॥ उपविष्टेषु सर्वेषु
एकदेशे स्थितो वणिक्॥ श्रांतो बुभुक्षितश्चैव यावदास्ते तरोरधः॥२८॥ तावत्तेषामपि
शाखानाथः प्रधानो महान्किल॥ अंतरिक्षात्तु घटो ब्रह्मन्दधिभक्तेन पूरितः॥२९॥ संका

रूढः सकलशः सजलः पुरतः स्थितः॥ तस्यास्तयातस्त्वेकः पिशाचः शीघ्रविक्रमः॥३०॥ सर्वेषां दधिभ
क्तं तु वटपत्रे व्यपादिशत्॥ भुक्तेषु तेषु सर्वेषु पिबत्सु तोयमुत्तमं॥३१॥ पिशाचाधिपतिः पश्चाद्बुभु
जे स्वे स्वेपि कृतनः॥ न चेतत्क्षीयते चान्नं जलं च द्विजसत्तम॥३२॥ एवं दिनानि चत्वारि दृष्ट्वा नेम
हदद्भुतं॥ पंचमेन्हि ततो पृच्छत्पिशाचाधिपतिं वणिक्॥३३॥ वणिगुवाच॥ आश्चर्यमेतद्दिव्यं कि
मिदं दृश्यते॥ अनुग्राह्यमे सर्वं कथ्यतां यदि मन्यसे॥३४॥ बहुभिर्भुक्तमेतच्च अन्नं याति न संक्ष
यं॥ पीतं तदपि पानीयं ममाश्चर्यमिहोच्यतां॥३५॥ कोसि त्वं च महाभाग के चेमे तव किंकराः॥
एतत्सर्वमशेषेण ब्रूहि त्वं मम पृच्छतः॥३६॥ पिशाच उवाच॥ अहमासं पुरा राजा बहुदृष्टस्यो
महाधनः॥ तत्र मे कुर्वतो राज्यं अहवो ब्राह्मणा हताः॥३७॥ विधवाश्च कृता नार्यो निर्दोषाश्च
जनाः कृताः॥ एवं पापप्रवृत्तेन कुर्वता पापमुल्बणं॥३८॥ पुरोहितो मया दृष्टः स्वगृहाद्ब
हिरागतः॥ पुष्पहस्तः सकलशः सजलः समुपोषितः॥३९॥ स च पृष्टो मया विप्रः किमर्थं
समुपोषितः॥ तेनापि कथितं तत्र श्रावणद्वादशीव्रतं॥४०॥ मयेदं क्रियते सम्यक्त्वम
प्येतत्कुरु प्रभो॥ सविधानं तु दृष्टेशात्कृतं सापि मया तदा॥४१॥ तद्व्रतस्य प्रभावेन फलं जा
तं ममानघ॥ पिशाचयोनावपि तद्भुज्यते दधिभक्तकं॥४२॥ यदन्नमेतदा दत्तं राजलं यच्च

Indira Gandhi National
Centre for the Arts

कांचनं ॥ फलं प्रभुज्यते तस्य पिशाचत्वेपि नियश्शः ॥४२॥ पिशाच मध्ये राज्यं मे प्रसादाद्वामन
स्य तु ॥ उपोषित फलं चैव तज्जातिस्मरणमेव च ॥४३॥ एते च सर्वे पापिष्ठाः पिशाचत्वमुपाग
ताः ॥ मां वहंति च से क्ते हृन्न कामा बुभुक्षिताः ॥४४॥ एतत्सर्वं मया ख्यातं तव वैश्य कु ३
लोद्भव ॥ उपकाराय सर्वेषां प्रवक्ष्यामि श्रृणुष्व तत् ॥४५॥ रजतं च मया ख्यस्तस्तु वर्णाभ
गतं पुरा ॥ अभिरूतानं च तत् वर्ण्ण श्रामी यक्ष मधो मुखं ॥४६॥ आदाय तत्र गच्छ स्व गयातीर्थ
३ मनुत्तमं ॥ त्वया च पिंडोदातव्यः सर्वेषां हितमाश्रिता ॥४७॥ पिशाचानां मया साई यथा पाप
क्षयो भवेत् ॥ तव संपुटिकां हस्ते सर्वेषां गोत्रनाम च ॥ ददौ क्षिलेख्य नामानि करुणा
समन्वित परं ॥४८॥ श्रुत्वा तस्य वणिग्वाक्यं तथेत्युक्त्वा जगाम हा ॥ राजधानीं ततो गत्वा
तदादाय धनं महत् ॥५०॥ सोमगा दयार्च मधा विपरोपकरणे रतः ॥ ददौ पिंडान् पि
शाचानां नाम गोत्रानुकीर्त्तनात् ॥५१॥ पिशाचाधिपमारभ्य सर्वेषामनुपूर्वशः ॥ ततस्ते
तेविमानस्थास्तमस्तुवेर्णिजं मुदा ॥५२॥ त्वया उद्धरिताः सर्वे किल्बिषाद्वणिजोत्तम ॥ प्रया

मः स्वर्गतिं सर्वे इदानीं त्वत्प्रसादतः ॥५३॥ साधुसंगो न हि वृथा कदाचिदिह जायते ॥ एवमुक्त्वा
गताः सर्वे विमाने सूर्यसन्निभे ॥५४॥ दिव्यरूपधरास्ते वै द्योतयंतो दिशो दश ॥ हरिदत्तोपि
तान्सर्वान्समुद्धृत्य जगाम ह ॥५५॥ स्वदेशं च स्वनगरं स्वगृहं च विवेश हा ॥ सूत उवाच ॥ इ
दं सर्वं मया ख्यातं श्रवण द्वादशी व्रतं ॥ अनुष्ठितं पुरा राज्ञो सर्वमेतद्धयातिना ॥५६॥ इ
इदं पुण्यं पापहरा सर्वकिल्बिषनाशिनी ॥ कुले तारयिते षां पुंसां तु द्विजसत्तम ॥५७॥ कृ
तार्थः सप्तवे ल्लोके श्रवण द्वादशीव्रतः ॥ उपोष्य भक्त्या संपूज्य दैदेवदेवं जनार्दनं ॥५८॥
यदिं स्वित् दं पठते कश्चिच्छृणुयादपि भक्तिमान् ॥ सोपि तद्गतिमाप्नोति विमुक्तः सर्व
किल्बिषैः ॥५९॥ ७ ॥ इति सौर पुराणे सूत शौनक संवादे श्रवण द्वादशी व्रत संपू
र्ण ॥ ७ ॥ श्रीवामनार्पणमस्तु ॥ शुभमस्तु ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥
दध्योदनयुतं तस्यां जलपूर्णं घटं द्विजे ॥ वस्त्रं संवेष्टितं दद्याच्छत्रोपानहमेव च ॥१॥
इति दानमंत्रः ॥ न दुर्गतिमवाप्नोति गतिस्वर्ग्यां च विंदति ॥१॥ श्रीरामचंद्र सहाय ॥२॥

Indira Gandhi National
Centre for the Arts

॥ ४ ॥

श्रवणद्वादशी

॥ ४ ॥

Indira Gandhi National
Centre for the Arts